Conclusion

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# ।। उपसंहारः ।।

अस्मिञ्जगति पदार्थानामनुशीलनं मानवस्य निसर्गतः स्वभाव एव। अस्माभिरपि अनुशीलनात्मकेऽमुस्मिन् शोधप्रबन्धे पाणिनिहेमचन्द्राचार्ययोः कारकमीमांसा विशदतया व्याख्याता। विना परिचयं न कापि कृतिः कार्ष्ण्येन रसभावं जनयति। अतः उभयोः कृतित्वव्यक्तित्व परिचयो नानामानपुरस्सरमुपनिबद्धः। व्याकरणतत्त्वस्थाने तदितिहासोऽपि पिपठिषूणां जिज्ञासामुत्पादयति खलु। तद्घटकत्वेन विषयविधया च अस्य शब्दराशेरुत्पत्तिकालत आरभ्य आपाणिनि शब्दानुशासनविकासयात्रा प्रदर्शिता। तथा तदुत्तरवर्तिकालोऽपि समालोचितः। पाणिनितोऽद्यपर्यन्तं समेषां प्रमुखाचार्याणां कृतिपूर्वकः कालनिर्देशः सन्निवेशितः।

अमुस्मिन्ननुशीलने कारकमीमांसां प्रधानभावेन समालोचितवान्। व्याकृतिशास्त्रे तु कारकं प्रमुखाङ्गत्वं सन्धत्ते। तर्हि अङ्गस्य वर्णानात्प्राग् अङ्गिनो वर्णनमेव ज्यायान् इति विचिन्त्य उभयरचयित्रोः शब्दपारायणवर्णनम् अनल्पप्रकारेण चित्रितम्। अत्र पाणिनिव्याकरणस्य महत्वम्, आचार्यस्य सूक्ष्मेक्षिका, व्याकरणस्य प्रत्यध्यायस्य वर्णनं संक्षेपेण समाकलितम्। तथैव आचार्यहेमचन्द्रस्य सप्तानाम् अध्यायानां नैज-वैशिष्ट्यपुरस्सरं पादशः परिचयः प्रदत्तः।

व्याकरणयोः द्वयोः परिचये कुत्र किं वैशिष्ट्यम् कश्चोभयव्याकृत्योः मध्ये भेदः तथा केन हेतुना इत्याकारकाः तत्वबोद्धॄणां चेतसि सहजतया समुत्पद्येत, अतः तद्भावं परिभाव्य व्याकरणवैशिष्ट्यं तथा महता प्रयत्नेन सकलशब्दानुशासनस्य प्रत्यध्यायस्य पादशो भेद अल्पमत्या प्रदर्शितः।

उभयव्याकरणयोः स्वस्मिन् परिपूर्णता वर्तते, आभ्यां सकलसंस्कृतशब्दाः परिनिष्ठितत्वमावहन्ते। तथाऽपि एकव्याकरणेन अपरशब्दानुशासनस्य गतार्थता नवा इति मार्मिकप्रश्नस्य सुचारुतया उत्तरः साररुपेण गुम्फितो वर्तते। गच्छता क्रमेण प्रबन्धस्यास्य प्रधानविषयविवेचनं विद्यते।

आचार्यपाणिनितः प्रारभ्य अस्मिन् सम्प्रदाये आविभूतैराचार्यैः कारकप्रश्ने क्रियमाणानां विचाराणामैतिहासिकक्रमेण पर्यवेक्षणमकुर्वामहे। अस्माभिः दृष्टं यत् मूलसूत्रव्याख्यायाः व्याजेन टीकाकाराः विभिन्नकारकाणां तात्विकमीमांसामकुरुत तथा संस्कृतभाषायां प्राप्तैः तथाकथितसन्दिग्धोदाहरणैः सह सामञ्जस्यं स्थापयन्तस्ते कारकस्य मौलिकप्रश्नस्य समाधानं कुर्वन्ते। कारकतत्वचिन्तने तथापि कारकत्वस्य प्रश्नोपरि तावती व्यापकरुपेण सामग्रीः नोपलभ्यते। टीकाकारैः कर्मादिकारकभेदानां विश्लेषणे उक्तविषयापेक्षया अधिकशक्तिः योजिता। अस्य प्रमुखकारणं तु तदेव प्रतीयते यत् पाणिनिः स्वयं 'कारकम्' न परिभाषितवान् तथा एतद् अन्वर्थसंज्ञां मत्वा अधिकारसूत्रान्तर्गतं स्थापितवान्, तथाऽपि कारकशक्तेः बाह्याभिव्यक्तेराधारेण परवर्तिन आचार्या अस्य लक्षणार्थं प्रयतन्ते, क्रिया-निर्वर्तकत्वम्, क्रियाजनकत्वम्, क्रियासम्पादकत्वं प्रभृतिलक्षणानि अस्य सर्वथा अनवद्यानि न सन्ति। एतद् अस्माभिः प्रतिपादितम्।

वस्तुतः कारकम् एका शक्तिः भवति या क्रियासम्पादने निजप्रवृत्तिं दर्शयति। एतद् दृष्ट्या कारकतत्त्वविवेचनं भाषावैज्ञानिकः शब्दशास्त्रीयो वा न भूत्वा दार्शनिक-कोटौ समागच्छति। शक्तेः द्रव्यभिन्नता व्याकरण-दर्शने अभ्युपगता एव भवतु नाम अत्र न्यायवैशेषिकाणां विरोध विद्यते। विषयेऽस्मिन् भर्तृहरेः शक्तिविवेचनं व्याकरण-दर्शने निष्कर्षरुपेण मन्वत आचार्याः, तत्र कारकलक्षणमस्मिन् शक्तिरुपे स्वीकृतं वर्तते।

एषा कारकशक्तिः विभक्तिद्वारा अभिव्यज्यते अतः तद्भिन्ना। प्रस्तुतप्रबन्धे सविस्तरं प्रयोगैस्समम् उभयोरन्तरं स्पष्टीकृतम्। यद्यपि विभक्तिशब्दस्य प्रयोगः पाणिनिव्याकृतौ सुप्-तिङ् तथा कतिपयतद्धितप्रत्ययार्थमपि जातः। तथापि अस्मिन् स्थाने कारकविभक्त्योः वैषम्यनिरुपणार्थं विभक्तिः सुप्-प्रत्ययमात्रे सीमीतार्थे गृहीताऽस्ति -एतदत्र प्रादर्शयम्। तथा एतदपि प्रत्यपादयं यत् विभक्तिः भाषायाः बहिरङ्गेण सम्बद्धा वर्तते कारकन्तु शक्तिरुपत्वात् अन्तरङ्गम् अर्थात् दार्शनिकपक्षेण अर्थपक्षेण वा सम्बद्धं वर्तते। कर्मादिकारकाणां क्रियया सम्बद्धोऽनिवार्यः, यतो हि कारकशक्तिः क्रियानिष्पत्तावेव विभिन्नप्रकारेण सहाय्यं कुरुते, द्रव्याणामुत्पत्तौ न। एतदेव कारक-

-करणयोर्मध्ये मौलिको भेदः। प्रसङ्गेऽस्मिन् स्पष्टीकरणार्थं सम्बद्धपरिच्छेदे क्रिया-स्वरुपम् अपेक्षाकृतं सविस्तरं विवेचितं यत्र न्याय-मीमांसा व्याकरणेषु विवेचित-धात्वर्थनिरुपणं वर्तते। प्रबन्धस्य व्याकरणोन्मुखत्वात् प्रान्ते व्याकरणमतस्यैव स्थापना कृता। वैयाकरणद्वारा फलव्यापारयोः संयुक्तार्थे धातोरभ्युपगमादेव सकर्मकाकर्मकधातोः व्यवस्थाऽस्ति तथा कारकाणां संख्यायाः क्रमिकविकासेऽपि प्रकाशो भवति।

कारकाणां संख्यायाः विकासोऽस्माभिः चतुर्षु चरणेषु प्रदर्शितः स चाधोलिखित-रुपेण वर्तते–

(१) कर्ता –

'कारक' शब्दस्य अन्वर्थतायाः सन्दर्भे एष एव प्राधान्येन मौलिककारकं सिद्धयति। अन्यकारकाण्यपि मूलतः कर्तृशक्त्या युक्तो भूत्वा एव निमित्तभेदेन तत्तत्कारकशक्तिम् अभिदधते। एतदेव अन्यकारकभेदानां कारकत्वं वर्तते येन तानि यथावसरं स्वस्य मूलशक्तेरभिव्यक्तये विवक्षया प्रेरितानि भवन्ति। अतः सर्वाषां भाषाणां मौलिककारकं कर्ता एव।

(२) कर्म –

कर्तृकारकानन्तरं द्वितीयं महत्वपूर्णस्थानम् अस्यैवाऽस्ति यतो हि धात्वर्थस्य (फलव्यापारयोः) आश्रयरुपे क्रमशः कर्ता तथा कर्म एव वर्तते क्रियानिष्पत्तौ अतः अनयोः सर्वाधिकरुपेण उपकारकताऽऽस्ते। न्यूनातिन्यूनम् एते द्वे कारके तु कस्या अपि भाषायाः कृते अनिवार्ये वर्तते।

(३) करणं तथा अधिकरणम् –

उभे कारके एतदर्थं तृतीयचरणस्य कारकं यत् पूर्वेण विद्यमानस्य कर्तुः कर्मणो वा सहायता क्रियानिष्पत्तौ करोति। अधिकस्पष्टरुपेण उच्यते तर्हि करणं क्रियानिष्पत्तौ निकटतमः स्थित्वा कर्तुरुपकारको वर्तते तथा अधिकरणं कर्तुः कर्मणो वा आधाररुपे प्रस्थाय उभयोरुपकारको विद्यते। पूर्वोक्तचतुर्षु कारकेषु प्रायः सारल्येन कर्तृत्वस्य मौलिकिसत्तायाः दर्शनं सम्भवति, अत

एव केचन नैजयुक्तिभिः चतुर्णां कारकाणामेव सत्तां दर्शयन्ति, किन्तु एतद् भ्रममूलको विचारः।

(४) सम्प्रदानापादाने –

अनयोः कारकयोः योगः उपर्युक्तकारकचक्रे अन्तिमे चरणे जातः। यद्यपि अस्य कारकत्वे प्रतिपक्षे बह्व्य प्रयुक्तयः प्रदत्ताः, तथाऽपि क्रमशः कर्तुः कर्मणोश्च उपकारकत्वात् क्रियाया अप्युपकारकौ स्वीक्रियेते येनानयोः कारकता सिद्ध्यति।

पाणिनेः सूत्रेषु कारकाणां पौर्वापर्यं वर्तते तद् अनेन चरणगतविकासेन पूर्णतया सङ्गतिं स्थापयति, हेमचन्द्रशब्दानुशासने एतादृशं सामञ्जस्यं न दृश्यते, तत्र 'कर्ता कर्म करणञ्च सम्प्रदानं तथैव च। अपादानाऽधिकरणञ्च इत्याहः कारकाणि षट्' इति क्रमेणैव वर्तते। पाणिनीयानुसारम् अपादान-सम्प्रदान-करणा-धिकरण-कर्म-कर्तृरुपेषु कारकाणां महत्वं क्रमशः वर्धते। अल्पोपयोगिकारकाणि पूर्वं प्रदर्शितानि, अत्र विप्रतिषेध-परिभाषायाः कारकेषु प्रवृत्तेः पृष्ठभूमौ एषैव युक्तिसङ्गतो विकासः कार्यं करोति। अपरप्रकारेण ब्रूमः चेत्–अपादानम् अन्यकारकाणि बाधन्ते ('अपादान-मुत्तराणि बाधन्ते'–पतञ्जलिवचनम्) यथा कर्त्रा अन्यकारकाणि बाधितानि भवन्ति। एतद् अतः सम्भवति यत् अपादाने न्यूनमहत्वस्थापकम् अन्तिमचरणगतकारकत्वमास्ते। कर्तरि च सर्वाधिक्येन परमोपयोगिमौलिकत्वमास्ते।

सम्बोधनस्य प्रश्नः वर्तते तत्तु न कुत्रापि कारकरुपे दृश्यते यतो हि क्रियां तु त्यजतु वाक्येनाऽपि तस्य सम्बन्धः किञ्चित् कष्टेनैव भवति। नागेशादयः केचन सुधियः तस्य कर्तृत्वस्य चर्चाम् उत्थापयन्ति, किन्तु एषा शक्तिरपि तस्मिन्नास्ति, तस्य प्रतिनिधित्वरुपसर्वनाम्नि आपतति। अतः साक्षात् क्रियाजनकशक्तेरभावात् तस्य कारकं चिन्त्यमेव।

एषैव स्थितिः शेषस्य वर्तते। यद्यपि केषाञ्चित् कारकाणां शेषत्वविवक्षा भवति, तथापि शेषः स्वयं कारकं न। शेषः स्वस्मिन् अपादानादि-भिन्नसम्बन्धं भणति यः उपपदसम्बन्धस्य मूलतः कारकसम्बन्धस्य रुपे अपि भवेत्, उभयत्र स्थित्योः

षष्ठीविभक्तिरेव भवति। याषु विभक्तिषु कारकशक्तिः द्योतिता न भवति, ता उपपदसम्बन्धव्यञ्जनात् उपपदविभक्तय उद्यन्ते।

कारकस्य भेदानां विशदनिरुपणे अस्माभिः त्रिणि चरणानि दृश्यन्ते।

(१) पाणिनिपतञ्जलिद्वारा उद्भावितकारकस्य कल्पना।

(२) भर्तृहरिद्वारा तस्य दार्शनिकविवेचनम्।

(३) नव्यव्याकरणे नव्यन्यायेन प्रभावितं विवेचनम्।

एषु त्रिष्वपि चरणेषु दृष्टिकोणस्य स्पष्टतया पार्थक्यं प्रतीयते। प्रथमचरणेषु कर्त्रादिकारकाणाम् आरम्भिकलक्षणं सरलतमशब्देशु प्रकटीक्रियन्ते, तानि लक्षणानि पतञ्जलिना कृतं सरसविश्लेषणं दार्शनिकरुपं प्रददाति। सर्वप्रथमं कारकाणाम् अवान्तरभेदानां कल्पनाऽपि भर्तृहरिग्रन्थ एवोलभ्यते। सत्यमेतद् यत् कर्मभेदानां कल्पना स्वयं पाणिनिः तथा अधिकरणभेदानां कल्पना पतञ्जलिरेव अकुरुत। एषः दुर्भाग्यस्यविषयः यत् व्याकृतिशास्त्रे भर्तृहरिपरम्परा न वृद्धिं गता। अनेन सिद्धयति यत् जनसामान्ये व्याकरणस्य दार्शनिकपक्षस्य अपेक्षा शब्दपक्षस्यैव प्राधान्यं अवर्तत।

तृतीयचरणे कारकं प्रविशेत् तत्प्रागेव नव्य-नैयायिकानां दृष्टिरपतत्-अस्मिन् भवानन्दो जगदीशस्तथा गदाधरः प्रमुखा आसन्। एते निजसम्प्रदायानां दार्शनिकानां मान्यतानुरुपं नव्यन्यायस्य विशिष्टाभिव्यञ्जनशैल्या प्रयोगं कुर्वाणाः कारकविशेषेषु विचारितवन्तः। फलस्वरुपम् अधुना कारकाणां प्रकरणे समागतशब्दानां शक्यतावच्छेदकम् अर्थात् कारकत्वम्, स्वतन्त्रत्वम्, कर्मत्वमित्यादीनां निर्वचनं समभवन्। सम्भाव्यते यत् अस्यां प्रक्रियायाम् अथवा अनया शैल्या चमत्कृतो भूत्वा व्याकरणमुदभवत्। भट्टोजिदीक्षितः, कौण्डभट्टः तथा नागेशप्रभृतिवैयाकरणाः एषां नैयायिकपक्षाणां तस्या एव भाषाशैलीमाधृत्य समालोचयन्। नव्यव्याकरणस्य सिद्धान्तानां परिज्ञानाय पृष्ठभूमिरुपेण एषां न्यायशास्त्रीयविचाराणां ज्ञानमावश्यकम्, अन्यथा परम्पराशृङ्खलायाः विच्छेदेन अभिव्यञ्जनायाः दुर्बोधभयं वर्तते।

अस्मिन् प्रबन्धे प्रायः सर्वत्र पृष्ठभूमौ न्यायशास्त्रीयविवेचनपुरस्सरं व्याकरण-स्थलक्षणानां विमर्शो विद्यते। मध्ये-मध्ये आचार्यहेमचन्द्रस्य मतमप्यस्ति।

शोधप्रबन्धस्यास्य साररुपेण एतन्निश्चप्रचं वक्तुं शक्यते यत् कणादं पाणिनीयञ्च 'सर्वशास्त्रोपकारकम्' हेमचन्द्रस्य कारके व्याकरणे च पाणिनीयतन्त्रच्छाया वरीवर्तत एव, तथाऽपि हेमचन्द्रेण अनुपाणिनि-आचार्यमतानां निजमतानाञ्च विशिष्टप्रतिभाद्वारा सम्मिश्रणं कृत्वा गुर्जरप्रान्ते विशेषरुपेण जैनसमाजे अध्ययनाध्यापनस्य नूत्ना पद्धती आरोपिता।

प्रबन्धेऽस्मिन् यथाशक्ति यथामति प्रसङ्गविषयेण सह कारकविषये प्राप्तानां विच्छिन्नविषयाणां विवेचनमभिनवतन्तौ स्वसीमायां ग्रथितम्।